## ಕರ್ನಾಟಕ ಪ್ರೌಢಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ
ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು–560003.

## KARNATAKA SECONDARY EDUCATION EXAMINATION BOARD
Malleshwaram, Bengaluru – 560003.

**2020-21 ಸಾಲಿನ ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ - 1**
**2020-21 MODEL QUESTION PAPER - 1**

**ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ – ಸಂಸ್ಕೃತ** — **ವಿಷಯ ಸಂಕೇತ : 16-S**
**Subject : FIRST LANGUAGE SANSKRIT** — **Subject Code : 16-S**
**ಅವಧಿ : 3 ಗಂಟೆ 15 ನಿಮಿಷ** — **ಗರಿಷ್ಠ ಅಂಕಗಳು : 100**
**Time : 3 hrs. 15 minutes** — **Max. Marks : 100**

**ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ**
**Regular Fresh**

---

### परीक्षार्थिनां सामान्यसूचना:

1) अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) वस्तुनिष्ठा: विषयनिष्ठाश्च प्रश्ना: सन्ति।

2) इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति। परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत। प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति पर्यालोचयत।

3) वस्तुनिष्ठानां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया:।

4) प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति।

5) प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति। पञ्चदशनिमेषा: प्रश्न पत्रस्य पठनार्थं निर्धारिता: सन्ति।

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः। तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत।** **6 x 1 = 6**

1. 'अग्निः' अस्य समानार्थकपदम् इदं भवति।

   A. अनलः

   B. विमलः

   C. अनिलः

   D. निर्मलः

2. 'वृद्धिः' अस्य विरुद्धार्थकपदम् इदं भवति।

   A. वयः

   B. जयः

   C. पयः

   D. क्षयः

3. 'महाराजः' अस्य स्त्रीलिङ्गरूपम् इदं भवति।

   A. महाराणी

   B. महाराजनी

   C. महारानी

   D. महाराज्ञी

4. 'भविष्यति' अत्र एषः लकारः वर्तते।

   A. लृट्लकारः

   B. लङ् लकारः

   C. लट्लकारः

   D. लोट्लकारः

5. वृत्रासुरः स्वभावतः <u>क्रूरः</u> आसीत्।

अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति।

A. कति

B. कथम्

C. कदा

D. कुत्र

6. 'भारते' अत्र एषा विभक्तिः वर्तते।

A. पञ्चमीविभक्तिः

B. चतुर्थीविभक्तिः

C. षष्ठीविभक्तिः

D. सप्तमीविभक्तिः

**II. चतुर्थ पदं लिखत। 4 x 1 = 4**

7. राजारामः – शरणागतः ~ मोघलसेना – ....................... ।

8. रसरत्नाकर :– नागार्जुन : ~ लीलावती – ..................... ।

9. नद्य :– समुद्रेऽस्तं गच्छन्ति ~ विद्वान् ..................... ।

10. रष्यादेशः – अणुविकिरण : ~ आर्टिक् प्रदेशः – .................... ।

**III. एकवाक्येन उत्तरं लिखत। 7 x 1 = 7**

11. इन्द्रः कस्य तपोवनं वव्राज?

12. राजारामस्य पिता कः?

13. कापालिकः कथम् आसीत्?

14. मोक्षप्राप्तिः केन भवति?

15. वारिमुचः कीदृशं जलं पिबन्ति?

16. ध्रुवः नारायणं साक्षात्कर्तुं कुत्र प्रस्थितः ?

17. श्वेतपारावतौ दग्धुं कः इच्छति ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत।** **4 x 2 = 8**

18. दधीचेः तपोवनं कथम् आसीत् ?

19. तैत्तिरीये सूर्यस्य विषये किं लिखितमस्ति ?

20. नरस्य वृत्तं के जानन्ति ?

21. हिमलिङ्गं कुत्र अस्ति ? तस्य दर्शनं प्रतिवर्षं कदा भविष्यति ?

**V. सूचनानुसारम् उत्तरं लिखत।** **4 x 2 = 8**

22. सन्धिं विभज्य नाम लिखत।

a. बालस्तत्र

b. चराचरम्

23. विग्रहवाक्यं विलिख्य समासनाम लिखत।

a. यथाशक्ति

b. दत्तधनः

अथवा

समासं कृत्वा समासनाम लिखत।

a. स्वर्गेण तुल्यः =

b. अन्यः देशः =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत।

a. बालकः पाठं पठितवान्।

b. भवान् गन्तुम् अर्हति।

25. वाक्यदोषं परिहरत –

a. शङ्करः अभिषेकः रोचते।

b. अक्षयः सिंहेन बिभेति।

**VI. संस्कृतभाषया अनुवादं कुरूत। 1 x 2 = 2**

26. ಶಾಲೆಯಲ್ಲಿ ವಿದ್ಯಾರ್ಥಿಗಳು ಇಂದು ಚೆನ್ನಾಗಿ ಓದುತ್ತಾರೆ. ನಾಳೆ ಉತ್ತಮ ಫಲಿತಾಂಶವನ್ನು ನೋಡಿ ಅವರು ಸಂತೋಷವನ್ನು ಅನುಭವಿಸುವರು.

Today - Students read well in the school. They will feel happy after seeing the good result tomorrow.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरूत। 1 x 2 = 2**

27. रावणो नाम राक्षसेश्वरः "लङ्काधिपतिः" इति प्रसिद्धः आसीत्। सः पञ्चवटीं आगत्य श्रीरामस्य पत्नीं सीतां अपहृतवान्।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत। 4 x 3 = 12**

28. याचको भूत्वा अत्र अहम् आगतः।

कः पाठः ? कम् अवदत् ? याचकरूपेण कः आगतः ?

29. अहमस्य प्रदास्यामि परमं वरमद्भुतम्।

कः पाठः ? कः वरं ददाति ? कस्मै वरं ददाति ?

30. मया भोजो रक्षितः

कः पाठः ? कः वदति ? कं वदति ?

31. किन्तु भवन्तं परिश्रान्तं पश्यामि।

कः पाठः ? का अवदत् ? अत्र परिश्रान्तः कः ?

अथवा

भवतु अस्माकं महाराज्ञी अभयदायिनी।

कः पाठः ? के अवदन् ? महाराज्ञी का ?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत।** **2 x 3 = 6**

32. बल्लाळसेनः।

33. डा।। के.एस्.नागराजन्।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकाभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।** **3 x 3 = 9**

34. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।।

35. यत्र कुत्र वा वयं समग्रभारते स्थिता,
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः।
आदितश्च मध्यतस्तथान्ततश्च भारता,
भारतीय भावनेति वृद्धिमेतु भारते।।

36. ततो गिरौ पपातैष इन्द्रवज्राभिताडितः।
पतमानस्य चैतस्य वामो हनुरभज्यत।।

अथवा

अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः।
अथान्यो राहुरासाद्य जग्राह सहसा रविम्।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं विवृणुत।** **1 x 3 = 3**

37. सौजन्यमेव सुवर्णम्

अथवा

श्रीरामः समुद्रः इव गम्भीरः

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत।** **1 x 3 = 3**

38. सुहृच्च विद्वानपि दुर्लभो नृणाम्।

**XIII. पद्यं पूरयत।** **1 x 4 = 4**

39. पिबन्ति ..........................................................................

.....................................................................................।

.....................................................................................

.......................................................................विभूतिः ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।** **3 x 4 = 12**

40. ध्रुवकथां सङ्गृह्य लिखत।

41. हनूमतः जननं बाल्यवृत्तान्तं च पद्यानुगुणं लिखत।

42. सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः ? विवृणुत।

अथवा

वृक्षायुर्वेदग्रन्थे प्रतिपादितानां चतुर्विधवृक्षाणां विषये लिखत।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।** **1 x 4 = 4**

43. एकदा काचित् मूषिका बिडालात् भीता कञ्चित् ऋष्याश्रमम् आगता। दया प्रेरितः ऋषिः तपः शक्त्या तां बालिकाम् अकरोत्। दिनेदिने वर्धिता सा बाला क्रमेण युवतिः बभूव। विवाहेतां योग्यवराय प्रदातुम् इच्छन् सः ऋषिः "कं परिणेतुम् इच्छसि ?" इति ताम् अपृच्छत्। "सर्वेभ्योऽपि बलिष्ठं वरयितुम् इच्छामि" इति सा अवदत्।

सूर्यः "सर्वेभ्यः अपि अधिकशक्तिमान्" इति निश्चित्य ऋषिः तां कन्यकां वरयितुं सूर्यदेवमेव प्रार्थयत। "सूर्यात् अपि बलवत्तरः यदि अस्ति, तमेव अहं वरयामि" इति सा कन्यका अवदत्। "त्वत्तोऽपि बलवत्तरः अस्ति वा ?" इति सा सूर्यदेवम् अपृच्छत्। "मेघः मत्तोऽपि बलवत्तरः यतः मम किरणाः तस्य पुरतः अशक्ताः भूत्वा भूतलं न प्राप्नुवन्ति" इति तेन उक्तम्। तदा ऋषिः तां मेघाय दातुम् उद्युक्तः अभवत्।

**प्रश्नाः**

i. का ऋष्याश्रमम् आगता ?

ii. युवतिः कं वरयितुम् इच्छति ?

iii. ऋषिः कन्यकां वरयितुं कं प्रार्थयत ?

iv. ऋषिः युवतीं कस्मै दातुम् उद्युक्तः अभवत् ?

**XVI. पत्रं लिखत।** **1 x 5 = 5**

44. भवन्तं मैसूरुमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा सहोदर्याः विवाहनिमित्तं दिनत्रयं विरामं प्राथ्र्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत।

अथवा

"संस्कृतशब्दकोशः" इति पुस्तकं प्रेषयितुं निवेद्य बेङ्गलूरूनगरस्य नवकर्नाटकप्रकाशनस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत।

**XVII. दशवाक्यैः प्रबन्धं लिखत।** **1 x 5 = 5**

45. परिसरः।

अथवा

राष्ट्रियोत्सवाः।